# ॥ અચ્યુતસ્તોત્રમ્ ચક્રધરસ્તોત્રં ચ ॥

.. achyutastotram from Garuda Purana ..

sanskritdocuments.org

August 2, 2016

# .. achyutastotram from Garuda Purana ..

# ॥ અચ્યુતસ્તોત્રમ્ ચક્રધરસ્તોત્રં ચ ॥

## Document Information

Text title : shrI achyutastotram from garuDapurANa

File name : achyutastotramgaruDapurANa.itx

Location : doc_vishhnu

Author : Vyasa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : NA

Source : shrIgAruDe mahApurANe adhyAya 234 mArkaNDeyakRitaM (or 226)

Latest update : December 12, 2015

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ અચ્યુતસ્તોત્રમ્ ॥

ગરુડપુરાણાન્તર્ગતમ્

સૂત ઉવાચ ।
વક્ષ્યેઽહમચ્યુતસ્તોત્રં શૃણુ શૌનક સર્વદમ્ ।
બ્રહ્મા પૃષ્ટો નારદાય યથોવાચ તથાપરમ્ ॥ ૧॥

નારદ ઉવાચ ।
યથાક્ષયોઽવ્યયો વિષ્ણુઃ સ્તોતવ્યો વરદો મયા ।
પ્રત્યહં ચાર્ચનાકાલે તથા ત્વં વક્તુમર્હસિ ॥ ૨॥

તે ધન્યાસ્તે સુજન્માનસ્તે હિ સર્વસુખપ્રદાઃ ।
સફલં જીવિતં તેષાં યે સ્તુવન્તિ સદાચ્યુતમ્ ॥ ૩ ॥

બ્રહ્મોવાચ ।
મુને સ્તોત્રં પ્રવક્ષ્યામિઃ વાસુદેવસ્ય મુક્તિદમ્ ।
શૃણુ યેન સ્તુતઃ સમ્યક્પૂજાકાલે પ્રસીદતિ ॥ ૪॥

ૐ નમો ભગવતે વાસુદેવાય નમઃ સર્વાપહારિણે । સર્વપાપહારિણે
નમો વિશુદ્ધદેહાય નમો જ્ઞાનસ્વરૂપિણે ॥ ૫॥

નમઃ સર્વસુરેશાય નમઃ શ્રીવત્સધારિણે ।
નમશ્ચર્માસિહસ્તાય નમઃ પઙ્કજમાલિને ॥ ૬॥

નમો વિશ્વપ્રતિષ્ઠાય નમઃ પીતામ્બરાય ચ ।
નમો નૃસિંહરૂપાય વૈકુણ્ઠાય નમોનમઃ ॥ ૭॥

નમઃ પઙ્કજનાભાય નમઃ ક્ષીરોદશાયિને ।
નમઃ સહસ્રશીર્ષાય નમો નાગાઙ્ગશાયિને ॥ ૮॥

નમઃ પરશુહસ્તાય નમઃ ક્ષત્ત્રાન્તકારિણે ।
નમઃ સત્યપ્રતિજ્ઞાય હ્યજિતાય નમોનમઃ ॥ ૯॥

નમસ્ત્રૈ લોક્યનાથાય નમશ્ચક્રધારય ચ ।
નમઃ શિવાય સૂક્ષ્માય પુરાણાય નમોનમઃ ॥ ૧૦॥

નમો વામનરૂપાય બલિરાજ્યાપહારિણે ।
નમો યજ્ઞવરાહાય ગોવિન્દાય નમોનમઃ ॥ ૧૧॥

નમસ્તે પરમાનન્દ નમસ્તે પરમાક્ષર ।
નમસ્તે જ્ઞાનસદ્ભાવ નમસ્તે જ્ઞાનદાયક ॥ ૧૨॥

નમસ્તે પરમાદ્વૈત નમસ્તે પુરુષોત્તમ ।

નમસ્તે વિશ્વકૃદ્દેવ નમસ્તે વિશ્વભાવન ॥ ૧૩ ॥

નમસ્તેઽસ્તુ વિશ્વનાથ નમસ્તે વિશ્વકારણ ।
નમસ્તે મધુદૈત્યઘ્ન નમસ્તે રાવણાન્તક ॥ ૧૪॥

નમસ્તે કંસકેશિઘ્ન નમસ્તે કૈટભાર્દન ।
નમસ્તે શતપત્રાક્ષ નમસ્તે ગરુડધ્વજ ॥ ૧૫॥

નમસ્તે કાલનેમિઘ્ન નમસ્તે ગરુડાસન ।
નમસ્તે દેવકીપુત્ર નમસ્તે વૃષ્ણિનન્દન ॥ ૧૬॥

નમસ્તે રુક્મિણીકાન્ત નમસ્તે દિતિનન્દન ।
નમસ્તે ગોકુલાવાસ નમસ્તે ગોકુલપ્રિય ॥ ૧૭॥

જય ગોપવપુઃ કૃષ્ણ જય ગોપીજનપ્રિય ।
જય ગોવર્ધનાધાર જય ગોકુલવર્ધન ॥ ૧૮॥

જય રાવણવીરઘ્ન જય ચાણૂરનાશન ।
જય વૃષ્ણિકુલોદ્દ્યોત જય કાલીયમર્દન ॥ ૧૯॥

જય સત્ય જગત્સાક્ષિન્જય સર્વાર્થસાધક ।
જય વેદાન્તવિદ્વેદ્ય જય સર્વદ માધવ ॥ ૨૦॥

જય સર્વાશ્રયાવ્યક્ત જય સર્વગ માધવ ।
જય સૂક્ષ્મચિદાન્દન જય ચિત્તનિરઞ્જન ॥ ૨૧॥

જયસ્તેઽસ્તુ નિરાલમ્બ જય શાન્ત સનાતન ।
જય નાથ જગત્પુષ્ટ (ત્પૂજ્ય) જય વિષ્ણો નમોઽસ્તૂતે ॥ ૨૨॥

ત્વં ગુરુસ્ત્વં હરે શિષ્યસ્ત્વં દીક્ષામન્ત્રમણ્ડલમ્ ।
ત્વં ન્યાસમુદ્રાસમયાસ્ત્વં ચ પુષ્પાદિસાધનમ્ ॥ ૨૩ ॥

ત્વમાધારસ્ત્વ હ્યનન્તસ્ત્વં કૂર્મસ્ત્વં ધરામ્બુજમ્ ।
ધર્મજ્ઞાનાદયસ્ત્વં હિ વેદિમણ્ડલશક્તયઃ ॥ ૨૪॥

ત્વં પ્રભો છલભૃદ્રામસ્ત્વં પુનઃ સ ખરાન્તકઃ ।
ત્વં બ્રહ્મર્ષિશ્ચદેવસ્ત્વં વિષ્ણુઃ સત્યપરાક્રમઃ ॥ ૨૫॥

ત્વં નૃસિંહઃ પરાનન્દો વરાહસ્ત્વં ધરાધરઃ ।
ત્વં સુપર્ણસ્તથા ચક્રં ત્વં ગદા શઙ્ખ એવ ચ ॥ ૨૬॥

ત્વં શ્રીઃ પ્રભો ત્વં મુષ્ટિસત્વં ત્વં માલા દેવ શાશ્વતી ।
શ્રીવત્સઃ કૌસ્તુભસ્ત્વં હિ શાર્ઙ્ગી ત્વં ચ તથેષુધિઃ ॥ ૨૭॥

ત્વં ખડ્ગચર્મણા સાર્ધં ત્વં દિક્પાલાસ્તથા પ્રભો ।

ત્વં વેધાસ્ત્વં વિધાતા ચ ત્વં યમસ્ત્વં હુતાશનઃ ॥ ૨૮॥

ત્વં ધનેશસ્ત્વમીશાનસ્ત્વમિન્દ્રસ્ત્વમપાંપતિઃ ।
ત્વં રક્ષોઽધિપતિઃ સાધ્યસ્ત્વં વાયુસ્ત્વં નિશાકરઃ ॥ ૨૯॥

આદિત્યા વસવો રુદ્રા અશ્વિનૌ ત્વં મરુદ્ગણાઃ ।
ત્વં દૈત્યા દાનવા નાગાસ્ત્વં યક્ષા રાક્ષસાઃ ખગાઃ ॥ ૩૦॥

ગન્ધર્વાપ્સરસઃ સિદ્ધાઃ પિતરસ્ત્વં મહામરાઃ ।
ભૂતાનિ વિષયસ્ત્વં હિ ત્વમવ્યક્તેન્દ્રિયાણિ ચ ॥ ૩૧॥

મનોબુદ્ધિરહઙ્કારઃ ક્ષેત્રજ્ઞસ્ત્વં હૃદીશ્વરઃ ।
ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમોઙ્કારઃ સમિત્કુશઃ ॥ ૩૨॥

ત્વં વેદી ત્વં હરે દીક્ષા ત્વં યૂપસ્ત્વં હુતાશનઃ ।
ત્વં પત્ની ત્વં પુરોડાશસ્ત્વં શાલા સ્રુક્ચ ત્વં સ્રુવઃ ॥ ૩૩॥

ગ્રાવાણઃ સકલં ત્વં હિ સદસ્યાસ્ત્વં સદાક્ષિણઃ ।
ત્વં સૂર્પાદિસ્ત્વં ચ બ્રહ્મા મુસલોલૂખલે ધ્રુવમ્ ॥ ૩૪॥

ત્વં હોતા યજમાનસ્ત્વં ત્વં ધાન્યં પશુયાજકઃ ।
ત્વમધ્વર્યુસ્ત્વમુદ્ગાતા ત્વં યજ્ઞઃ પુરુષોત્તમઃ ॥ ૩૫॥

દિક્પાતાલમહિ વ્યોમ દ્યૌસ્ત્વં નક્ષત્રકારકઃ ।
દેવતિર્યઙ્મનુષ્યેષુ જગદેતચ્ચરાચરમ્ ॥ ૩૬॥

યત્કિઞ્ચિદ્દૃશ્યતે દેવ બ્રહ્માણ્ડમખિલં જગત્ ।
તવ રૂપમિદં સર્વં દૃષ્ટ્યર્થં સંપ્રકાશિતમ્ ॥ ૩૭॥

નાથયન્તે પરં બ્રહ્મ દૈવેરપિ દુરાસદમ્ ।
કસ્તજ્જાનાતિ વિમલં યોગગમ્યમતીન્દ્રિયમ્ ॥ ૩૮॥

અક્ષયં પુરુષં નિત્યમવ્યક્તમજમવ્યયમ્ ।
પ્રલયોત્પત્તિરહિતં સર્વવ્યાપિનમીશ્વરમ્ ॥ ૩૯॥

સર્વજ્ઞં નિર્ગુણં શુદ્ધમાનન્દમજરં પરમ્ ।
બોધરૂપં ધ્રુવં શાન્તં પૂર્ણમદ્વૈતમક્ષયમ્ ॥ ૪૦॥

અવતારેષુ યા મૂર્તિર્વિદૂરે દેવ દૃશ્યતે ।
પરં ભાવમજાનન્તસ્ત્વાં ભજન્તિ દિવૌકસઃ ॥ ૪૧॥

કથં ત્વામીદૃશં સૂક્ષ્મં શક્નોમિ પુરુષોત્તમ ।
અરાધયિતુમીશાન મનોગમ્યમગોચરમ્ ॥ ૪૨॥

ઇહ યન્મણ્ડલે નાથ પૂજ્યતે વિધિવત્ક્રમૈઃ ।

પુષ્પધૂપાદિભિર્યત્ર તત્ર સર્વા વિભૂતયઃ ॥ ૪૩ ॥

સંકર્ષણાદિભેદેન તવ યત્પૂજિતા મયા ।
ક્ષન્તુમર્હસિ તત્સર્વં યત્કૃતં ન કૃતં મયા ॥ ૪૪॥

ન શક્નોમિ વિભો સમ્યક્કર્તું પૂજાં યથોદિતામ્ ।
યત્કૃતં જપહોમાદિ અસાધ્યં પુરુષોત્તમ ॥ ૪૫॥

વિનિષ્પાદયિતું ભક્ત્યા અત સ્ત્વાં ક્ષમયામ્યહમ્ ।
દિવા રાત્રૌ ચ સન્ધ્યાયાં સર્વાવસ્થાસુ ચેષ્ટતઃ ॥ ૪૬॥

અચલા તુ હરે ! ભક્તિસ્તવાઙ્ઘ્રિયુગલે મમ ।
શરીરેણ તથા પ્રીતિર્ન ચ ધર્માદિકેષુ ચ ॥ ૪૭॥

યથા ત્વયિ જગન્નાથ પ્રીતિરાત્યન્તિકી મમ ।
કિં તેન ન કૃતં કર્મ સ્વર્ગમોક્ષાદિસાધનમ્ ॥ ૪૮॥

યસ્ય વિષ્ણૌ દૃઢા ભક્તિઃ સર્વકામફલપ્રદે ।
પૂજાં કર્તું તથા સ્તોત્રં કઃ શક્નોતિ તવાચ્યુત ॥ ૪૯॥

સ્તુતં તુ પૂજિતં મેઽદ્ય તત્ક્ષમસ્વ નમોઽસ્તુ તે ।
ઇતિ ચક્રધરસ્તોત્રં મયા સમ્યગુદાહૃતમ્ ।
સ્તૌહિ વિષ્ણું મુને ભક્ત્યા યદીચ્છસિ પરં પદમ્ ॥ ૫૦॥

સ્તોત્રેણાનેન યઃ સ્તૌતિ પૂજાકાલે જગદ્ગુરુમ્ ॥ ૫૧॥

અચિરાલ્લભતે મોક્ષં છિત્વા સંસારબન્ધનમ્ ।
અન્યોઽપિ યો જપેદ્ભક્ત્યા ત્રિસન્ધ્યં નિયતઃ શુચિઃ ॥ ૫૨॥

ઇદં સ્તોત્રં મુને સોઽપિ સર્વકામમવાપ્નુયાત્ ।
પુત્રાર્થી લભતે પુત્રાન્બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૫૩ ॥

રોગાદ્વિમુચ્યતે રાગી લભતે નિર્ધનો ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યાં ભાગ્યં કીર્તિં ચ વિન્દતિ ॥ ૫૪॥ યશઃ
જાતિ સ્મરત્વં મેધાવી યદ્યદિચ્છતિ ચેતસા ।
સ ધન્યઃ સર્વવિત્પ્રાજ્ઞઃ સ સાધુઃ સર્વકર્મકૃત્ ॥ ૫૫॥

સ સત્યવાક્યશ્છુચિર્દાતા યઃ સ્તૌતિ પુરુષોત્તમમ્ ।
અસંભાષ્યા હિ તે સર્વે સર્વધર્મબહિષ્કૃતાઃ ॥ ૫૬॥

યેષાં પ્રવર્તને નાસ્તિ હરિમુદ્દિશ્ય સત્ક્રિયા ।
ન શુદ્ધં વિદ્યતે તસ્ય મનો વાક્ચ દુરાત્મનઃ ॥ ૫૭॥

યસ્ય સર્વાર્થદે વિષ્ણૌ ભક્તિર્નાવ્યભિચારિણી ।

આરાધ્ય વિધિવદ્દેવં હરિં સર્વસુખપ્રદમ્ ॥ ૫૮॥

પ્રાપ્નોતિ પુરુષઃ સમ્યગ્યદ્યત્પ્રાર્થયતે ફલમ્ ।
કર્મ કામાદિકં સર્વં શ્રદ્ધધાનઃ સુરોત્તમઃ ।
અસુરાદિવપુઃ સિદ્ધૈર્દૃયતે યસ્ય નાન્તરમ્ ॥ ૫૯॥

સકલમુનિભિરાદ્યશ્ચિન્ત્યતે યો હિ શુદ્ધો
   નિખિલહૃદિ નિવિષ્ટો વેત્તિ યઃ સર્વસાક્ષી ।
તમજમમૃતમીશં વાસુદેવં નતોઽસ્મિ
   ભયમરણવિહીનં નિત્યમાનન્દરૂપમ્ ॥ ૬૦॥

નિખિલભુવનનાથં શાશ્વતં સુપ્રસન્નં
   ત્વતિવિમલવિશુદ્ધં નિર્ગુણં ભાવપુષ્પૈઃ ।
સુખમુદિતસમસ્તં પૂજયામ્યાત્મભાવં
   વિશતુ હૃદયપદ્મે સર્વસાક્ષી ચિદાત્મા ॥ ૬૧॥

એવં મયોક્તં પરમપ્રભાવમાદ્યન્તહીનસ્ય પરસ્ય વિષ્ણોઃ ।
તસ્માદ્વિચિન્ત્યઃ પરમેશ્વરોઽસૌ વિમુક્તિકામેન નરેણ સમ્યક્ ॥ ૬૨॥

બોધસ્વરૂપં પુરુષં પુરાણમાદિત્યવર્ણં વિમલં વિશુદ્ધમ્ ।
સઞ્ચિન્ત્ય વિષ્ણું પરમદ્વિતીયં કસ્તત્ર યોગી ન લંય પ્રયાતિ ॥ ૬૩॥

ઇમં સ્તવં યઃ સતતં મનુષ્યઃ પઠેચ્ચ તદ્વત્પ્રયતઃ પ્રશાન્તઃ ।
સ ધૂતપાપ્મા વિતતપ્રભાવઃ પ્રયાતિ લોકં વિતતં મુરારેઃ ॥ ૬૪॥

યઃ પ્રાર્થયત્યર્થમશેષસૌખ્યં ધર્મં ચ કામં ચ તથૈવ મોક્ષમ્ ।
સ સર્વમુત્સૃજ્ય પરં પુરાણં પ્રયાતિ વિષ્ણું શરણં વરેણ્યમ્ ॥ ૬૫॥

વિભું પ્રભું વિશ્વધરં વિશુદ્ધમશેષસંસારવિનાશહેતુમ્ ।
યો વાસુદેવં વિમલં પ્રપન્નઃ સ મોક્ષમાપ્નોતિ વિમુક્તસઙ્ગઃ ॥ ૬૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે-
ઽચ્યુતસ્તોત્રં નામ ચતુસ્ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ ॥

---

Garuda Purana 1,234.1-66 (varied 227 with 56 verses)

was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com